राजन्यस्य त्रैष्टुभः। त्रैष्टुभो हि। हि राजन्यः। राजन्यः शय्युम्। शय्युम् बार्हस्पत्यम्। शय्यु-मिति शम्—युम्। बार्हस्पत्यम् मेधः। मेधो न। नोप। उपानमत्। अनमथ् सः। सोऽग्निम्। अग्निम् प्र। प्राविशत्। अविशथ् सः। ॥ [३५] ॥ सोऽग्नेः। अग्नेः कृष्णः। कृष्णो रूपम्। रूपम् कृत्वा। कृत्वोत्। उदायत। आयत सः। सोऽश्वम्। अश्वम् प्र। प्राविशत्। अविशथ् सः। सोऽश्वस्य। अश्वस्यावान्तरशफः। अवान्तरशफोऽभवत्। अवान्तरशफ इत्यवान्तर—शफः। अभवद् यत्। यदश्वम्। अश्वमाक्रमयति। आक्रमयति यः। आक्रमयतीत्या—क्रम-यति। य एव। एव मेधः। मेधोऽश्वम्। अश्वम् प्र। प्राविशत्। अविशत् तम्। तमेव। एवाव। अव रुन्धे। रुन्धे प्रजापतिना। प्रजापतिनाऽग्निः। प्रजापतिनेति प्रजा—पतिना। अग्निश्चेतव्यः। चेतव्य इति। इत्याहुः। आहुः प्राजापत्यः। प्राजापत्योऽश्वः। प्राजापत्य इति प्राजा—पत्यः। अश्वो यत्। यदश्वम्। अश्वमाक्रमयति। आक्रमयति प्रजापतिना। आक्रमयतीत्या—क्रमयति। प्रजापतिनैव। प्रजापतिनेति प्रजा—पतिना। एवाग्निम्। अग्निम् चिनुते। चिनुते पुष्करपर्णम्। पुष्करपर्णमुप। पुष्करपर्णमिति पुष्कर—पर्णम्। उप दधाति। दधाति योनिः। योनिर् वै। वा अग्नेः। अग्नेः पुष्करपर्णम्। पुष्करपर्णꣳ सयोनिम्। पुष्करपर्णमिति पुष्कर—पर्णम्। सयो-निमेव। सयोनिमिति स—योनिम्। एवाग्निम्। अग्निम् चिनुते। चिनुतेऽपाम्। अपाम् पृष्ठम्। पृष्ठमसि। असीति। इत्युप। उप दधाति। दधात्यपाम्। अपाव्वै। वा एतत्। एतत् पृष्ठम्। पृष्ठय्यँत्। यत् पुष्करपर्णम्। पुष्करपर्णꣳ रूपेण। पुष्करपर्णमिति पुष्कर—पर्णम्। रूपेणैव। एवैनत्। एनदुप। उप दधाति। दधातीति दधाति॥ ॥ [३६] ॥

(इन्द्रः पशुकामस्य भवत्य विशथ् सयोनिम् विꣳशतिश्च) ॥ ६ ॥

ब्रह्म जज्ञानम्। जज्ञानमिति। इति रुक्मम्। रुक्ममुप। उप दधाति। दधाति ब्रह्ममुखाः। ब्रह्ममुखा वै। ब्रह्ममुखा इति ब्रह्म—मुखाः। वै प्रजापतिः। प्रजापतिः प्रजाः। प्रजापतिरिति प्रजा—पतिः। प्रजा असृजत। प्रजा इति प्र—जाः। असृजत ब्रह्ममुखाः। ब्रह्ममुखा एव। ब्रह्म-मुखा इति ब्रह्म—मुखाः। एव तत्। तत् प्रजाः। प्रजा यजमानः। प्रजा इति प्र—जाः। यज-मानः सृजते। सृजते ब्रह्म। ब्रह्म जज्ञानम्। जज्ञानमिति। इत्याह। आह तस्मात्। तस्माद्

ब्राह्मणः। ब्राह्मणो मुख्यः। मुख्यो मुख्यः। मुख्यो भवति। भवति यः। य एवम्। एव-
व्वेँद। वेद ब्रह्मवादिनः। ब्रह्मवादिनो वदन्ति। ब्रह्मवादिन इति ब्रह्म—वादिनः। वदन्ति न।
न पृथिव्याम्। पृथिव्याम् न। नान्तरिख्षे। अन्तरिख्षे न। न दिवि। दिव्यग्निः। अग्निश्चे-
तव्यः। चेतव्य इति। इति यत्। यत् पृथिव्याम्। पृथिव्याम् चिन्वीत। चिन्वीत पृथिवीम्।
पृथिवीꣳ शुचा। शुचाऽर्पयेत्। अर्पयेन् न। नौषधयः। ओषधयो न। न वनस्पतयः। वनस्प-
तयः प्र। ॥ [३७] ॥ प्र जायेरन्न्। जायेरन्न्यत्। यदन्तरिख्षे। अन्तरिख्षे चिन्वीत। चिन्वी-
तान्तरिख्षम्। अन्तरिख्षꣳ शुचा। शुचाऽर्पयेत्। अर्पयेन् न। न वयाꣳसि। वयाꣳसि प्र। प्र
जायेरन्न्। जायेरन्न्यत्। यद् दिवि। दिवि चिन्वीत। चिन्वीत दिवम्। दिवꣳ शुचा। शुचाऽर्पयेत्।
अर्पयेन् न। न पर्जन्यः। पर्जन्यो वर्षेत्। वर्षेद् रुक्मम्। रुक्ममुप। उप दधाति। दधात्य-
मृतम्। अमृतँव्वै। वै हिरण्यम्। हिरण्यममृतम्। अमृत एव। एवाग्निम्। अग्निम् चिनुते। चिनुते
प्रजात्यै। प्रजात्यै हिरण्मयम्। प्रजात्या इति प्र—जात्यै। हिरण्मयम् पुरुषम्। पुरुषमुप। उप
दधाति। दधाति यजमानलोकस्य। यजमानलोकस्य विधृत्यै। यजमानलोकस्येति यजमान—
लोकस्य। विधृत्यै यत्। विधृत्या इति वि—धृत्यै। यदिष्टकायाः। इष्टकाया आतृण्णम्। आतृ-
ण्णमनूपदद्ध्यात्। आतृण्णमित्या—तृण्णम्। अनूपदद्ध्यात् पशूनाम्। अनूपदद्ध्यादित्यनु—
उपदद्ध्यात्। पशूनाम् च। च यजमानस्य। यजमानस्य च। च प्राणम्। प्राणमपि। प्राण-
मिति प्र—अनम्। अपि दद्ध्यात्। दद्ध्याद् दख्षिणतः। दख्षिणतः प्राञ्चम्। ॥ [३८] ॥
प्राञ्चमुप। उप दधाति। दधाति दाधार। दाधार यजमानलोकम्। यजमानलोकम् न। यज-
मानलोकमिति यजमान—लोकम्। न पशूनाम्। पशूनाम् च। च यजमानस्य। यजमानस्य
च। च प्राणम्। प्राणमपि। प्राणमिति प्र—अनम्। अपि दधाति। दधात्यथो। अथो खलु।
अथो इत्यथो। खल्विष्टकायाः। इष्टकाया आतृण्णम्। आतृण्णमनु। आतृण्णमित्या—तृण्णम्।
अनूप। उप दधाति। दधाति प्राणानाम्। प्राणानामुथ्सृष्ट्यै। प्राणानामिति प्र—अनानाम्।
उथ्सृष्ट्यै द्रप्सः। उथ्सृष्ट्या इत्युत्—सृष्ट्यै। द्रप्सश्चस्कन्द। चस्कन्देति। इत्यभि। अभि
मृशति। मृशति होत्रासु। होत्रास्वेव। एवैनम्। एनम् प्रति। प्रति ष्ठापयति। स्थापयति स्रुचौ।
स्रुचावुप। उप दधाति। दधात्याज्यस्य। आज्यस्य पूर्णाम्। पूर्णाम् कार्ष्मर्यमयीम्। कार्ष्मर्य-

मयीँम् दद्ध्नः। कार्ष्मर्यमयीमिति काष्मर्य—मयीँम्। दद्ध्नः पूर्णाम्। पूर्णामौदुम्बरीम्। औदु-म्बरीमियम्। इयव्वै। वै कार्ष्मर्यमयीँ। कार्ष्मर्यमय्यसौ। कार्ष्मर्यमयीति कार्ष्मर्य—मयीँ। असा-वौदुम्बरी। औदुम्बरीमे। इमे एव। इमे इतीमे। एवोप। उप धत्ते। धत्ते तूष्णीम्। ॥ [३९] ॥ तूष्णीमुप। उप दधाति। दधाति न। न हि। हीमे। इमे यजुषा। इमे इतीमे। यजुषाऽऽप्तुम्। आप्तु-मर्हति। अर्हति दक्षिणाम्। दक्षिणाम् कार्ष्मर्यमयीँम्। कार्ष्मर्यमयीमुत्तराम्। कार्ष्मर्यम-यीमिति कार्ष्मर्य—मयीँम्। उत्तरामौदुम्बरीम्। उत्तरामित्युत्—तराम्। औदुम्बरीम् तस्मात्। तस्मादस्याः। अस्या असौ। असावुत्तरा। उत्तराऽऽज्यस्य। उत्तरेत्युत्—तरा। आज्यस्य पूर्णाम्। पूर्णाम् कार्ष्मर्यमयीँम्। कार्ष्मर्यमयीव्वज्रः। कार्ष्मर्यमयीमिति कार्ष्मर्य—मयीँम्। वज्रो वै। वा आज्यम्। आज्यव्वज्रः। वज्रः कार्ष्मर्यः। कार्ष्मर्यो वज्रेण। वज्रेणैव। एव यज्ञस्य। यज्ञस्य दक्षिणतः। दक्षिणतो रक्षांꣳसि। रक्षाꣳस्यप। अप हन्ति। हन्ति दद्ध्नः। दद्ध्नः पूर्णाम्। पूर्णामौदुम्बरीम्। औदुम्बरीम् पशवः। पशवो वै। वै दधि। दद्ध्यूर्क्। ऊर्गुदुम्बरः। उदुम्बरः पशुषु। पशुष्वेव। एवोर्जम्। ऊर्जम् दधाति। दधाति पूर्णे। पूर्णे उप। पूर्णे इति पूर्णे। उप दधाति। दधाति पूर्णे। पूर्णे एव। पूर्णे इति पूर्णे। एवैनम्। एनममुष्मिन्न्। ॥ [४०] ॥ अमु-ष्मिꣳल्लोके। लोक उप। उप तिष्ठेते। तिष्ठेते विराजि। तिष्ठेते इति तिष्ठेते। विराज्यग्निः। विराजीति वि—राजि। अग्निश्चेतव्यः। चेतव्य इति। इत्याहुः। आहुः स्रुक्। स्रुग् वै। वै विराट्। विराड् यत्। विराडिति वि—राट्। यत् स्रुचौ। स्रुचावुपदधाति। उपदधाति विराजि। उपदधातीत्युप—दधाति। विराज्येव। विराजीति वि—राजि। एवाग्निम्। अग्निम् चिनुते। चिनुते यज्ञमुखेयज्ञ-मुखे। यज्ञमुखेयज्ञमुखे वै। यज्ञमुखेयज्ञमुख इति यज्ञमुखे—यज्ञमुखे। वै क्रियमाणे। क्रियमाणे यज्ञम्। यज्ञꣳ रक्षांꣳसि। रक्षांꣳसि जिघांꣳसन्ति। जिघांꣳसन्ति यज्ञमुखम्। यज्ञमुखꣳ रुक्मः। यज्ञमुखमिति यज्ञ—मुखम्। रुक्मो यत्। यद् रुक्मम्। रुक्मव्व्याघारयति। व्याघा-रयति यज्ञमुखात्। व्याघारयतीति वि—आघारयति। यज्ञमुखादेव। यज्ञमुखादिति यज्ञ—मुखात्। एव रक्षांꣳसि। रक्षाꣳस्यप। अप हन्ति। हन्ति पञ्चभिः। पञ्चभिर् व्याघारयति। पञ्चभिरिति पञ्च—भिः। व्याघारयति पाङ्क्तः। व्याघारयतीति वि—आघारयति। पाङ्क्तो यज्ञः। यज्ञो यावान्। यावानेव। एव यज्ञः। यज्ञस्तस्मात्। तस्माद् रक्षांꣳसि। रक्षाꣳस्यप।

अप॑ हन्ति। ह॒न्त्य॒क्ष्ण॒या। अ॒क्ष्ण॒या व्याघा॑रयति। व्याघा॑रयति॒ तस्मा᳚त्। व्याघा॑रय॒तीति॑ वि—आघा॑रयति। तस्मा॑द॒क्ष्ण॒या। अ॒क्ष्ण॒या प॒शव॑ः। प॒शवोऽङ्गा॑नि। अङ्गा॑नि॒ प्र। प्र ह॑रन्ति। ह॒र॒न्ति॒ प्रति॑ष्ठित्यै। प्रति॑ष्ठित्या॒ इति॒ प्रति॑—स्थि॒त्यै॒॥ ॥ [४१] ॥

(व॒नस्पत॑यो द॒क्षि॒ण॒तो ध॑त्त ए॒न॒म् तस्मा॑ द॒क्ष्ण॒या पञ्च॑ च) ॥ ७ ॥

स्व॒य॒मा॒तृ॒ण्णामुप॑। स्व॒य॒मा॒तृ॒ण्णामिति॑ स्वयम्—आ॒तृ॒ण्णाम्। उप॑ दधाति। द॒धा॒ती॒यम्। इ॒यँव्वै। वै स्व॑यमातृ॒ण्णा। स्व॒य॒मा॒तृ॒ण्णेमाम्। स्व॒य॒मा॒तृ॒ण्णेति॑ स्वयम्—आ॒तृ॒ण्णा। इ॒मामे॒व। ए॒वोप॑। उप॑ धत्ते। ध॒त्तेऽश्वम्᳚। अश्व॒मुप॑। उप॑ घ्रापयति। घ्रा॒प॒य॒ति॒ प्रा॒णम्। प्रा॒णमे॒व। प्रा॒णमिति॑ प्र—अ॒नम्। ए॒वास्या᳚म्। अ॒स्या॒म् द॒धा॒ति॒। द॒धा॒त्यथो᳚। अथो᳚ प्राजाप॒त्यः। अथो॒ इत्यथो᳚। प्रा॒जा॒प॒त्यो वै। प्रा॒जा॒प॒त्य इति॑ प्राजा—प॒त्यः। वा अश्व॑ः। अश्व॑ः प्र॒जाप॑तिना। प्र॒जाप॑तिनै॒व। प्र॒जाप॑ति॒नेति॑ प्र॒जा—प॒ति॒ना। ए॒वाग्निम्। अ॒ग्निम् चि॑नुते। चि॒नु॒ते प्र॒थ॒मा। प्र॒थ॒मेष्ट॑का। इष्ट॑कोपधी॒यमा॑ना। उ॒प॒धी॒यमा॑ना पशू॒नाम्। उ॒प॒धी॒य॒मा॒नेत्यु॑प—धी॒यमा॑ना। प॒शू॒नाम् च॑। च॒ यज॑मानस्य। यज॑मानस्य च। च॒ प्रा॒णम्। प्रा॒णमपि॑। प्रा॒णमिति॑ प्र—अ॒नम्। अपि॑ दधाति। द॒धा॒ति॒ स्व॒य॒मा॒तृ॒ण्णा। स्व॒य॒मा॒तृ॒ण्णा भ॑वति। स्व॒य॒मा॒तृ॒ण्णेति॑ स्वयम्—आ॒तृ॒ण्णा। भ॒व॒ति॒ प्रा॒णाना᳚म्। प्रा॒णा॒नामु॑थ्सृ॑ष्ट्यै। प्रा॒णा॒नामिति॑ प्र—अ॒नाना᳚म्। उथ्सृ॑ष्ट्या॒ अथो᳚। उथ्सृ॑ष्ट्या॒ इत्यु॑त्—सृ॒ष्ट्यै॒। अथो᳚ सु॒व॒र्गस्य॑। अथो॒ इत्यथो᳚। सु॒व॒र्गस्य॑ लो॒कस्य॑। सु॒व॒र्गस्येति॑ सुवः—गस्य॑। लो॒कस्यानु॑ख्यात्यै। अनु॑ख्यात्या अ॒ग्नौ। अनु॑ख्यात्या॒ इत्यनु॑—ख्या॒त्यै॒। अ॒ग्नाव॒ग्निः। अ॒ग्निश्चे॑त॒व्य॑ः। चे॒त॒व्य॑ इति॑। इत्या॑हुः। आ॒हु॒रे॒षः। ए॒ष वै। वा अ॒ग्निः। ॥ [४२] ॥ अ॒ग्निर् वै᳚श्वान॒रः। वै॒श्वा॒न॒रो यत्। यद् ब्रा᳚ह्म॒णः। ब्रा॒ह्म॒णस्तस्मै᳚। तस्मै᳚ प्र॒थ॒माम्। प्र॒थ॒मामिष्ट॑काम्। इष्ट॑का॒यँय्यजु॑ष्कृताम्। यजु॑ष्कृता॒म् प्र। यजु॑ष्कृता॒मिति॒ यजु॑ः—कृ॒ता॒म्। प्र य॑च्छेत्। य॒च्छे॒त् ताम्। ताम् ब्रा᳚ह्म॒णः। ब्रा॒ह्म॒णश्च॑। चोप॑। उप॑ दद्ध्यात् ताम्। द॒द्ध्या॒ता॒म॒ग्नौ। अ॒ग्नावे॒व। ए॒व तत्। तद॒ग्निम्। अ॒ग्निम् चि॑नुते। चि॒नु॒त ई॒श्व॒रः। ई॒श्व॒रो वै। वा ए॒षः। ए॒ष आर्ति॒म्᳚। आर्ति॒मार्तो᳚ः। आर्तो॒र् यः। आर्तो॒रित्या—अ॒र्तोः। योऽवि॑द्वान्। अवि॑द्वा॒निष्ट॑काम्। इष्ट॑कामुप॒दधा॑ति। उ॒प॒दधा॑ति॒ त्रीन्। उ॒प॒द॒धा॒तीत्यु॑प—दधा॑ति। त्रीन्वरा॑न्। वरा᳚न् दद्यात्। द॒द्या॒त् त्रय॑ः। त्रयो॒ वै। वै प्रा॒णाः। प्रा॒णाः प्रा॒णाना᳚म्। प्रा॒णा इति॑

प्र—अनाः। प्राणानाꣳ स्पृत्यै। प्राणानामिति प्र—अनानाम्। स्पृत्यै द्वौ। द्वावेव। एव देयौ। देयौ द्वौ। द्वौ हि। हि प्राणौ। प्राणावेकः। प्राणाविति प्र—अनौ। एक एव। एव देयः। देय एकः। एको हि। हि प्राणः। प्राणः पशुः। प्राण इति प्र—अनः। पशुर् वै। ॥ [४३] ॥ वा एषः। एष यत्। यदग्निः। अग्निर् न। न खलु। खलु वै। वै पशवः। पशव आयवसे। आयवसे रमन्ते। रमन्ते दूर्वेष्टकाम्। दूर्वेष्टकामुप। दूर्वेष्टकामिति दूर्वा—इष्टकाम्। उप दधाति। दधाति पशूनाम्। पशूनाम् धृत्यै। धृत्यै द्वाभ्याम्। द्वाभ्याम् प्रतिष्ठित्यै। प्रतिष्ठित्यै काण्डात् काण्डात्। प्रतिष्ठित्या इति प्रति—स्थित्यै। काण्डात्,काण्डात् प्ररोहन्ती। काण्डात्,काण्डादिति काण्डात्—काण्डात्। प्ररोहन्तीति। प्ररोहन्तीति प्र—रोहन्ती। इत्याह। आह काण्डेन,काण्डेन। काण्डेन काण्डेन हि। काण्डेन काण्डेनेति काण्डेन—काण्डेन। ह्येषा। एषा प्रतितिष्ठति। प्रतितिष्ठत्येवा। प्रतितिष्ठतीति प्रति—तिष्ठति। एवा नः। नो दूर्वे। दूर्वे प्र। प्र तनु। तनु सहस्रेण। सहस्रेण शतेन। शतेन च। चेति। इत्याह। आह साहस्रः। साहस्रः प्रजापतिः। प्रजापतिः प्रजापतेः। प्रजापतिरिति प्रजा—पतिः। प्रजापतेराप्त्यै। प्रजापतेरिति प्रजा—पतेः। आप्त्यै देवलक्ष्मम्। देवलक्ष्मव्वै। देवलक्ष्ममिति देव—लक्ष्मम्। वै त्र्यालिखिता। त्र्यालिखिता ताम्। त्र्यालिखितेति त्रि—आलिखिता। तामुत्तरलक्ष्माणम्। उत्तरलक्ष्माणम् देवाः। उत्तरलक्ष्माणमित्युत्तर—लक्ष्माणम्। देवा उप। उपादधत। अदधताधरलक्ष्माणम्। अधरलक्ष्माणमसुराः। अधरलक्ष्माणमित्यधर—लक्ष्माणम्। असुरा यम्। यम् कामयेत। ॥ [४४] ॥ कामयेत वसीयान्। वसीयान्थ् स्यात्। स्यादिति। इत्युत्तरलक्ष्माणम्। उत्तरलक्ष्माणम् तस्य। उत्तरलक्ष्माणमित्युत्तर—लक्ष्माणम्। तस्योप। उप दद्ध्यात्। दद्ध्याद् वसीयान्। वसीयानेव। एव भवति। भवति यम्। यम् कामयेत। कामयेत पापीयान्। पापीयान्थ् स्यात्। स्यादिति। इत्यधरलक्ष्माणम्। अधरलक्ष्माणम् तस्य। अधरलक्ष्माणमित्यधर—लक्ष्माणम्। तस्योप। उप दद्ध्यात्। दद्ध्यादसुरयोनिम्। असुरयोनिमेव। असुरयोनिमित्यसुर—योनिम्। एवैनम्। एनमनु। अनु परा। परा भावयति। भावयति पापीयान्। पापीयान् भवति। भवति त्र्यालिखिता। त्र्यालिखिता भवति। त्र्यालिखितेति त्रि—आलिखिता। भवतीमे। इमे वै। वै लोकाः। लोकास्त्र्यालिखिता। त्र्यालिखितैभ्यः। त्र्यालिखितेति त्रि—आलिखिता। एभ्य एव। एव लोकेभ्यः।

लोकेभ्यो भ्रातृव्यम्। भ्रातृव्यमन्तः। अन्तरेति। एत्यङ्गिरसः। अङ्गिरसः सुवर्गम्। सुव-र्गँल्लोकम्। सुवर्गमिति सुवः—गम्। लोकय्ँयतः। यतः पुरोडाशः। पुरोडाशः कूर्मः। कूर्मो भूत्वा। भूत्वाऽनु। अनु प्र। प्रासर्पत्। असर्पद् यत्। ॥ [४५] ॥ यत् कूर्मम्। कूर्ममुपद-धाति। उपदधाति यथा। उपदधातीत्युप दधाति। यथा क्षेत्रवित्। क्षेत्रविदञ्जसा। क्षेत्र-विदिति क्षेत्र—वित्। अञ्जसा नयति। नयत्येवम्। एवमेव। एवैनम्। एनम् कूर्मः। कूर्मः सुवर्गम्। सुवर्गँल्लोकम्। सुवर्गमिति सुवः—गम्। लोकमञ्जसा। अञ्जसा नयति। नयति मेधः। मेधो वै। वा एषः। एष पशूनाम्। पशूनाय्ँयत्। यत् कूर्मः। कूर्मो यत्। यत् कूर्मम्। कूर्ममुप-दधाति। उपदधाति स्वम्। उपदधातीत्युप—दधाति। स्वमेव। एव मेधम्। मेधम् पश्यन्तः। पश्यन्तः पशवः। पशव उप। उप तिष्ठन्ते। तिष्ठन्ते श्मशानम्। श्मशानव्ँवै। वा एतत्। एतत् क्रियते। क्रियते यत्। यन् मृतानाम्। मृतानाम् पशूनाम्। पशूनाꣳ शीर्षाणि। शीर्षाण्यु-पधीयन्ते। उपधीयन्ते यत्। उपधीयन्त इत्युप—धीयन्ते। यज् जीवन्तम्। जीवन्तम् कूर्मम्। कूर्ममुपदधाति। उपदधाति तेन। उपदधातीत्युप—दधाति। तेनाश्मशानचित्। अश्मशानचिद् वास्तव्यः। अश्मशानचिदित्यश्मशान—चित्। वास्तव्यो वै। वा एषः। एष यत्। यत् कूर्मः। ॥ [४६] ॥ कूर्मो मधु। मधु वाताः। वाता ऋतायते। ऋतायत इति। ऋतायत इत्यृत—यते। इति दध्ना। दध्ना मधुमिश्रेण। मधुमिश्रेणाभि। मधुमिश्रेणेति मधु—मिश्रेण। अभ्यनक्ति। अनक्ति स्वदयति। स्वदयत्येव। एवैनम्। एनम् ग्राम्यम्। ग्राम्यव्ँवै। वा एतत्। एतदन्नम्। अन्नय्ँयत्। यद् दधि। दध्यारण्यम्। आरण्यम् मधु। मधु यत्। यद् दध्ना। दध्ना मधु-मिश्रेण। मधुमिश्रेणाभ्यनक्ति। मधुमिश्रेणेति मधु—मिश्रेण। अभ्यनक्त्युभयस्य। अभ्यनक्ती-त्यभि—अनक्ति। उभयस्यावरुद्ध्यै। अवरुद्ध्यै मही। अवरुद्ध्या इत्यव—रुद्ध्यै। मही द्यौः। द्यौः पृथिवी। पृथिवी च। च नः। न इति। इत्याह। आहाभ्याम्। आभ्यामेव। एवैनम्। एनमुभ-यतः। उभयतः परि। परि गृह्णाति। गृह्णाति प्राञ्चम्। प्राञ्चमुप। उप दधाति। दधाति सुवर्गस्य। सुवर्गस्य लोकस्य। सुवर्गस्येति सुवः—गस्य। लोकस्य समष्ट्यै। समष्ट्यै पुरस्तात्। समष्ट्या इति सम्—अष्ट्यै। पुरस्तात् प्रत्यञ्चम्। प्रत्यञ्चमुप। उप दधाति। दधाति तस्मात्। तस्मात् पुरस्तात्। ॥ [४७] ॥ पुरस्तात् प्रत्यञ्चः। प्रत्यञ्चः पशवः। पशवो मेधम्। मेधमुप। उप

तिष्ठन्ते। तिष्ठन्ते यः। यो वै। वा अप॑नाभिम्। अप॑नाभिम॒ग्निम्। अप॑नाभि॒मित्यप॑—ना॒भि॒म्। अ॒ग्निम् चि॑नु॒ते। चि॒नु॒ते यज॑मानस्य। यज॑मानस्य॒ नाभि॑म्। नाभि॒मनु॑। अनु॒ प्र। प्र वि॑शति। वि॒श॒ति॒ सः। स ए॑नम्। ए॒न॒मीश्व॑रः। ई॒श्व॒रो हि॒ꣳसि॑तोः। हि॒ꣳसि॑तोरु॒लूख॑लम्। उ॒लूख॑ल॒मुप॑। उप॑ दधाति। द॒धा॒त्ये॒षा। ए॒षा वै। वा अ॒ग्नेः। अ॒ग्नेर् नाभि॑ः। नाभि॒ः सना॑भिम्। सना॑भिमे॒व। सना॑भि॒मिति॒ स—ना॒भि॒म्। ए॒वाग्निम्। अ॒ग्निम् चि॑नुते। चि॒नु॒तेऽहि॑ꣳसायै। अहि॑ꣳसाया॒ औदु॑-म्बरम्। औदु॑म्बरम् भवति। भ॒व॒त्यूर्क्। ऊर्ग् वै। वा उदु॑म्बरः। उ॒दु॒म्ब॒र॒ ऊर्ज॑म्। ऊर्ज॑मे॒व। ए॒वाव॑। अव॑ रुन्धे। रु॒न्धे॒ म॒द्ध्य॒तः। म॒द्ध्य॒त उप॑। उप॑ दधाति। द॒धा॒ति॒ म॒द्ध्य॒तः। म॒द्ध्य॒त ए॒व। ए॒वास्मै॑। अ॒स्मा॒ ऊर्ज॑म्। ऊर्ज॑म् दधाति। द॒धा॒ति॒ तस्मा॑त्। तस्मा॑न् मद्ध्य॒तः। म॒द्ध्य॒त ऊ॒र्जा। ऊ॒र्जा भुं॒ञ्जते। भु॒ञ्ज॒त इ॒यत्। इ॒यद् भ॑वति। भ॒व॒ति॒ प्र॒जाप॑तिना। प्र॒जाप॑तिना यज्ञमु॒खेन॑। प्र॒जाप॑ति॒नेति॑ प्र॒जा—प॒ति॒ना। य॒ज्ञ॒मु॒खेन॒ सम्मि॑तम्। य॒ज्ञ॒मु॒खेनेति॑ य॒ज्ञ—मु॒खेन॑। सम्मि॑त॒मव॑। सम्मि॑त॒मिति॒ सम्—मि॒त॒म्। अव॑ हन्ति। ह॒न्त्यन्न॑म्। अन्न॑मे॒व। ए॒वार्कः॑। अ॒कर् वै॒ष्ण॒व्या। वै॒ष्ण॒व्य॒र्चा। ऋ॒चोप॑। उप॑ दधाति। द॒धा॒ति॒ विष्णु॑ः। विष्णु॒र् वै। वै य॒ज्ञः। य॒ज्ञो वै॑ष्ण॒वाः। वै॒ष्ण॒वा व॒न॒स्पत॑यः। व॒न॒स्पत॑यो य॒ज्ञे। य॒ज्ञ ए॒व। ए॒व य॒ज्ञम्। य॒ज्ञम् प्रति॑। प्रति॑ष्ठापयति। स्था॒प॒य॒तीति॑ स्थापयति॥ ॥ [४८] ॥

(ए॒ष वै प॒शु र्य॑ मसर्प दे॒ष यत् तस्मात् तस्मा॑थ् स॒प्तविं॑ꣳशतिश्च) ॥ ८ ॥

---

ए॒षाँवै। वा ए॒तत्। ए॒त॒ल्लो॒काना॑म्। लो॒काना॒म् ज्योति॑ः। ज्योति॒ः सम्भृ॑तम्। सम्भृ॑त॒य्ँयत्। सम्भृ॑त॒मिति॒ सम्—भृ॒त॒म्। यदु॒खा। उ॒खा यत्। यदु॒खाम्। उ॒खामु॒पद॑धाति। उ॒प॒द॒धा॑त्ये॒भ्यः। उ॒प॒द॒धा॒तीत्यु॑प—द॒धाति। ए॒भ्य ए॒व। ए॒व लो॒केभ्य॑ः। लो॒केभ्यो॒ ज्योति॑ः। ज्योति॒रव॑। अव॑ रुन्धे। रु॒न्धे॒ म॒द्ध्य॒तः। म॒द्ध्य॒त उप॑। उप॑ दधाति। द॒धा॒ति॒ म॒द्ध्य॒तः। म॒द्ध्य॒त ए॒व। ए॒वास्मै॑। अ॒स्मै ज्योति॑ः। ज्योति॒र् दधाति। द॒धा॒ति॒ तस्मा॑त्। तस्मा॑न् मद्ध्य॒तः। म॒द्ध्य॒तो ज्योति॑ः। ज्योति॒रुप॑। उपा॑स्महे। आ॒स्म॒हे॒ सिक॑ताभिः। सिक॑ताभिः पूरयति। पू॒र॒य॒त्ये॒तत्। ए॒तद् वै। वा अ॒ग्नेः। अ॒ग्नेर् वै॑श्वान॒रस्य॑। वै॒श्वा॒न॒रस्य॑ रू॒पम्। रू॒पꣳ रू॒पेण॑। रू॒पेणै॒व। ए॒व वै॑श्वान॒रम्। वै॒श्वा॒न॒रमव॑। अव॑ रुन्धे। रु॒न्धे॒ यम्। यम् का॒मये॑त। का॒मये॑त॒ क्षोधु॑कः। क्षोधु॑कः स्यात्। स्या॒दिति॑। इ॒त्यू॒नाम्।

ऊनाम् तस्य। तस्योप। उप दद्ध्यात्। ॥ [४९] ॥ दद्ध्यात् ख्षोधुकः। ख्षोधुक एव। एव भवति। भवति यम्। यम् कामयेत। कामयेतानुपदस्यत्। अनुपदस्यदन्नम्। अनुपदस्यदित्य-नुप—दस्यत्। अन्नमद्यात्। अद्यादिति। इति पूर्णाम्। पूर्णाम् तस्य। तस्योप। उप दद्ध्यात्। दद्ध्यादनुपदस्यत्। अनुपदस्यदेव। अनुपदस्यदित्यनुप—दस्यत्। एवान्नम्। अन्नमत्ति। अत्ति सहस्रम्। सहस्रव्वै। वै प्रति। प्रति पुरुषः। पुरुषः पशूनाम्। पशूनाय्यँच्छति। यच्छति सहस्रम्। सहस्रमन्ये। अन्ये पशवः। पशवो मद्ध्ये। मद्ध्ये पुरुषशीर्षम्। पुरुषशीर्षमुप। पुरुषशीर्षमिति पुरुष—शीर्षम्। उप दधाति। दधाति सवीर्यत्वाय। सवीर्यत्वायोखायाम्। सवीर्यत्वायेति सवीर्य—त्वाय। उखायामपि। अपि दधाति। दधाति प्रतिष्ठाम्। प्रतिष्ठामेव। प्रतिष्ठामिति प्रति—स्थाम्। एवैनत्। एनद् गमयति। गमयति व्यृद्धम्। व्यृद्धव्वै। व्यृद्धमिति वि—ऋद्धम्। वा एतत्। एतत् प्राणैः। प्राणैरमेद्ध्यम्। प्राणैरिति प्र—अनैः। अमेद्ध्यय्यँत्। यत् पुरुषशीर्षम्। पुरुषशीर्षममृतम्। पुरुषशीर्षमिति पुरुष—शीर्षम्। अमृतम् खलु। खलु वै। वै प्राणाः। प्राणा अमृतम्। प्राणा इति प्र—अनाः। ॥ [५०] ॥ अमृतꣳ हिरण्यम्। हिरण्यम् प्राणेषु। प्राणेषु हिरण्यशल्कान्। प्राणेष्विति प्र—अनेषु। हिरण्यशल्कान् प्रति। हिर-ण्यशल्कानिति हिरण्य—शल्कान्। प्रत्यस्यति। अस्यति प्रतिष्ठाम्। प्रतिष्ठामेव। प्रतिष्ठामिति प्रति—स्थाम्। एवैनत्। एनद् गमयित्वा। गमयित्वा प्राणैः। प्राणैः सम्। प्राणैरिति प्र—अनैः। समर्द्धयति। अर्द्धयति दद्ध्ना। दद्ध्ना मधुमिश्रेण। मधुमिश्रेण पूरयति। मधुमिश्रेणेति मधु—मिश्रेण। पूरयति मधव्यः। मधव्योऽसानि। असानीति। इति शृतातङ्क्येन। शृतातङ्क्येन मेद्ध्यत्वाय। शृतातङ्क्येनेति शृत—आतङ्क्येन। मेद्ध्यत्वाय ग्राम्यम्। मेद्ध्यत्वायेति मेद्ध्य—त्वाय। ग्राम्यव्वै। वा एतत्। एतदन्नम्। अन्नय्यँत्। यद् दधि। दद्ध्यारण्यम्। आरण्यम् मधु। मधु यत्। यद् दद्ध्ना। दद्ध्ना मधुमिश्रेण। मधुमिश्रेण पूरयति। मधुमिश्रेणेति मधु—मिश्रेण। पूरयत्युभयस्य। उभयस्यावरुद्ध्यै। अवरुद्ध्यै पशुशीर्षाणि। अवरुद्ध्या इत्यव—रुद्ध्यै। पशु-शीर्षाण्युप। पशुशीर्षाणीति पशु—शीर्षाणि। उप दधाति। दधाति पशवः। पशवो वै। वै पशुशीर्षाणि। पशुशीर्षाणि पशून्। पशुशीर्षाणीति पशु—शीर्षाणि। पशूनेव। एवाव। अव रुन्धे। रुन्धे यम्। यम् कामयेत। कामयेतापशुः। अपशुः स्यात्। स्यादिति। इति विषूची-

नानि। ॥ [५१] ॥ विषूचीनानि तस्य। तस्योप। उप दद्ध्यात्। दद्ध्याद् विषूचः। विषूच एव। एवास्मात्। अस्मात् पशून्। पशून् दधाति। दधात्यपशुः। अपशुरेव। एव भवति। भवति यम्। यम् कामयेत। कामयेत पशुमान्। पशुमान्थ् स्यात्। पशुमानिति पशु—मान्। स्यादिति। इति समीचीनानि। समीचीनानि तस्य। तस्योप। उप दद्ध्यात्। दद्ध्याथ् समीचः। समीच एव। एवास्मै। अस्मै पशून्। पशून् दधाति। दधाति पशुमान्। पशुमानेव। पशुमानिति पशु—मान्। एव भवति। भवति पुरस्तात्। पुरस्तात् प्रतीचीनम्। प्रतीचीनमश्वस्य। अश्वस्योप। उप दधाति। दधाति पश्चात्। पश्चात् प्राचीनम्। प्राचीनमृषभस्य। ऋषभस्यापशवः। अपशवो वै। वा अन्ये। अन्ये गो अश्वेभ्यः। गो अश्वेभ्यः पशवः। गो अश्वेभ्य इति गो—अश्वेभ्यः। पशवो गो अश्वान्। गो अश्वानेव। गो अश्वानिति गो—अश्वान्। एवास्मै। अस्मै समीचः। समीचो दधाति। दधात्येतावन्तः। एतावन्तो वै। वै पशवः। पशवो द्विपादः। ॥ [५२] ॥ द्विपादश्च। द्विपाद इति द्वि—पादः। च चतुष्पादः। चतुष्पादश्च। चतुष्पाद इति चतुः—पादः। च तान्। तान्वै। वा एतत्। एतदग्नौ। अग्नौ प्र। प्र दधाति। दधाति यत्। यत् पशुशी-र्षाणि। पशुशीर्षाण्युपदधाति। पशुशीर्षाणीति पशु—शीर्षाणि। उपदधात्यमुम्। उपद-धातीत्युप—दधाति। अमुमारण्यम्। आरण्यमनु। अनु ते। ते दिशामि। दिशामीति। इत्याह। आह ग्राम्येभ्यः। ग्राम्येभ्य एव। एव पशुभ्यः। पशुभ्य आरण्यान्। पशुभ्य इति पशु—भ्यः। आरण्यान् पशून्। पशूञ्छुचम्। शुचमनु। अनूत्। उथ् सृजति। सृजति तस्मात्। तस्माथ् समावत्। समावत् पशूनाम्। पशूनाम् प्रजायमानानाम्। प्रजायमानानामारण्याः। प्रजायमा-नानामिति प्र—जायमानानाम्। आरण्याः पशवः। पशवः कनीयाꣳसः। कनीयाꣳसः शुचा। शुचा हि। ह्यृताः। ऋताः सर्पशीर्षम्। सर्पशीर्षमुप। सर्पशीर्षमिति सर्प—शीर्षम्। उप दधाति। दधाति या। यैव। एव सर्पे। सर्पे त्विषिः। त्विषिस्ताम्। तामेव। एवाव। अव रुन्धे। रुन्धे यत्। ॥ [५३] ॥ यथ् समीचीनम्। समीचीनम् पशुशीर्षैः। पशुशीर्षैरुपदद्ध्यात्। पशुशीर्षैरिति पशु—शीर्षैः। उपदद्ध्याद् ग्राम्यान्। उपदद्ध्यादित्युप—दद्ध्यात्। ग्राम्यान् पशून्। पशून् दꣳशुकाः। दꣳशुकाः स्युः। स्युर् यत्। यद् विषूचीनम्। विषूचीनमारण्यान्। आरण्यान् यजुः। यजुरेव। एव वदेत्। वदेदव। अव ताम्। ताम् त्विषिम्। त्विषिꣳ रुन्धे। रुन्धे

या। या सर्पे। सर्पे न। न ग्राम्यान्। ग्राम्यान् पशून्। पशून् हिनस्ति। हिनस्ति न। नारण्यान्। आरण्यानथो। अथो खलु। अथो इत्यथो। खलूपधेयम्। उपधेयमेव। उपधेयमित्युप—धेयम्। एव यत्। यदुपदधाति। उपदधाति तेन। उपदधातीत्युप—दधाति। तेन ताम्। ताम् त्विषिम्। त्विषिमव। अव रुन्धे। रुन्धे या। या सर्पे। सर्पे यत्। यद् यजुः। यजुर् वदति। वदति तेन। तेन शान्तम्। शान्तमिति शान्तम्॥ ॥ [५४] ॥

(ऊनान्तस्योप प्राणाः स्यादिति वै पशवो रुन्धे चतुश्चत्वारिꣳशच्च) ॥ ९ ॥

पशुर् वै। वा एषः। एष यत्। यदग्निः। अग्निर् योनिः। योनिः खलु। खलु वै। वा एषा। एषा पशोः। पशोर् वि। वि क्रियते। क्रियते यत्। यत् प्राचीनम्। प्राचीनमैष्टकात्। ऐष्टकाद् यजुः। यजुः क्रियते। क्रियते रेतः। रेतोऽपस्याः। अपस्या अपस्याः। अपस्या उप। उप दधाति। दधाति योनौ। योनावेव। एव रेतः। रेतो दधाति। दधाति पञ्च। पञ्चोप। उप दधाति। दधाति पाङ्क्ताः। पाङ्क्ताः पशवः। पशवः पशून्। पशूनेव। एवास्मै। अस्मै प्र। प्र जनयति। जनयति पञ्च। पञ्च दक्षिणतः। दक्षिणतो वज्रः। वज्रो वै। वा अपस्याः। अपस्या वज्रेण। वज्रेणैव। एव यज्ञस्य। यज्ञस्य दक्षिणतः। दक्षिणतो रक्षाꣳसि। रक्षाꣳस्यप। अप हन्ति। हन्ति पञ्च। पञ्च पश्चात्। पश्चात् प्राचीः। ॥ [५५] ॥ प्राचीरुप। उप दधाति। दधाति पश्चात्। पश्चाद् वै। वै प्राचीनम्। प्राचीनꣳ रेतः। रेतो धीयते। धीयते पश्चात्। पश्चादेव। एवास्मै। अस्मै प्राचीनम्। प्राचीनꣳ रेतः। रेतो दधाति। दधाति पञ्च। पञ्च पुरस्तात्। पुरस्तात् प्रतीचीः। प्रतीचीरुप। उप दधाति। दधाति पञ्च। पञ्च पश्चात्। पश्चात् प्राचीः। प्राचीस्तस्मात्। तस्मात् प्राचीनम्। प्राचीनꣳ रेतः। रेतो धीयते। धीयते प्रतीचीः। प्रतीचीः प्रजाः। प्रजा जायन्ते। प्रजा इति प्र—जाः। जायन्ते पञ्च। पञ्चोत्तरतः। उत्तरतश्छन्दस्याः। उत्तरत इत्युत्—तरतः। छन्दस्याः पशवः। पशवो वै। वै छन्दस्याः। छन्दस्याः पशून्। पशूनेव। एव प्रजातान्। प्रजातान्थ्स्वम्। प्रजाता-निति प्र—जातान्। स्वमायतनम्। आयतनमभि। आयतनमित्या—यतनम्। अभि परि। पर्यू-हते। ऊहत इयम्। इयवै। वा अग्नेः। अग्नेरतिदाहात्। अतिदाहादबिभेत्। अतिदाहादित्यति—दाहात्। अबिभेथ् सा। सैताः। एता अपस्याः। ॥ [५६] ॥ अपस्या अपश्यत्। अपश्यत्

ताः। ता उप॑। उपा॑धत्त। अ॒ध॒त्त तत॑ः। ततो॒ वै। वा इ॒माम्। इ॒माम् न। नाति॑। अत्य॑दहत्। अ॒द॒ह॒द् यत्। यद॑पस्या᳚ः। अ॒प॒स्या॑ उ॒प॒दधा॑ति। उ॒प॒दधा॒त्य॒स्याः। उ॒प॒द॒धा॒तीत्यु॑प—दधा॑ति। अ॒स्या अन॑तिदाहाय। अन॑तिदाहायो॒वाच॑। अन॑तिदाहा॒येत्यन॑ति—दा॒हा॒य। उ॒वाच॑ ह। हे॒यम्। इ॒यमद॑त्। अद॒दित्। इथ् सः। स ब्रह्म॑णा। ब्र॒ह्म॒णाऽन्न᳚म्। अ॒न्नँय्यँस्य॑। यस्यै॒ताः। ए॒ता उ॑पधी॒-यान्तै᳚। उ॒प॒धी॒यान्तै॒ यः। उ॒प॒धी॒यान्ता॒ इत्यु॑प—धीयान्तै᳚। य उ॑। उ॒ च॒। चै॒नाः। ए॒ना॒ ए॒वम्। ए॒वँव्वेद॑त्। वे॒द॒दिति॑। इति॑ प्राण॒भृत॑ः। प्रा॒ण॒भृ॒त उप॑। प्रा॒ण॒भृ॒त इति॑ प्राण—भृत॑ः। उप॑ दधाति। द॒धा॒ति॒ रेत॑सि। रेत॑स्ये॒व। ए॒व प्रा॒णान्। प्रा॒णान् द॑धाति। प्रा॒णानिति॑ प्र—अ॒नान्। द॒धा॒ति॒ तस्मा᳚त्। तस्मा॒द् वद॑न्न्। वद॑न् प्रा॒णन्न्। प्रा॒णन् पश्य॑न्न्। प्रा॒णन्निति॑ प्र—अ॒नन्न्। पश्य॑ञ्छृ॒ण्वन्न्। शृ॒ण्वन् प॒शुः। प॒शुर् जा॑यते। जा॒य॒तेऽयम्। अ॒यम् पु॒रः। पु॒रो भुव॑ः। ॥ [५७] ॥ भु॒व इति॑। इति॑ पु॒रस्ता᳚त्। पु॒रस्ता॒दुप॑। उप॑ दधाति। द॒धा॒ति॒ प्रा॒णम्। प्रा॒णमे॒व। प्रा॒णमिति॑ प्र—अ॒नम्। ए॒वै-ताभि॑ः। ए॒ताभि॑र् दाधार। दा॒धा॒रा॒यम्। अ॒यम् द॑क्षिणा। द॒क्षि॒णा वि॒श्वक॑र्मा। वि॒श्वक॒र्मेति॑। वि॒श्वक॒र्मेति॑ वि॒श्व—क॒र्मा। इति॑ द॑क्षिण॒तः। द॒क्षि॒ण॒तो मन॑ः। मन॑ ए॒व। ए॒वैताभि॑ः। ए॒ताभि॑र् दाधार। दा॒धा॒रा॒यम्। अ॒यम् प॒श्चात्। प॒श्चाद् वि॒श्वव्य॑चाः। वि॒श्वव्य॑चा॒ इति॑। वि॒श्वव्य॑चा॒ इति॑ वि॒श्व—व्य॒चाः। इति॑ प॒श्चात्। प॒श्चाच् चक्षु॑ः। चक्षु॑रे॒व। ए॒वैताभि॑ः। ए॒ताभि॑र् दाधार। दा॒धा॒-रे॒दम्। इ॒दमु॑त्त॒रात्। उ॒त्त॒राथ् सुव॑ः। उ॒त्त॒रादित्यु॑त्—त॒रात्। सु॒वरिति॑। इत्यु॑त्त॒रत॑ः। उ॒त्त॒रत॑ः श्रोत्र᳚म्। उ॒त्त॒र॒त इत्यु॑त्—त॒रत॑ः। श्रोत्र॑मे॒व। ए॒वैताभि॑ः। ए॒ताभि॑र् दाधार। दा॒धा॒रे॒यम्। इ॒यमु॒-परि॑। उ॒परि॑ म॒तिः। म॒तिरिति॑। इत्यु॒परि॑ष्टात्। उ॒परि॑ष्टाद् वाच᳚म्। वाच॑मे॒व। ए॒वैताभि॑ः। ए॒ताभि॑र् दाधार। दा॒धा॒र॒ दश॑दश। दश॑द॒शोप॑। दश॑द॒शेति॒ दश॑—द॒श। उप॑ दधाति। द॒धा॒ति॒ स॒वी॒र्य॒-त्वाय॑। स॒वी॒र्य॒त्वाया᳚क्ष्णया। स॒वी॒र्य॒त्वायेति॑ सवीर्य—त्वाय॑। अ॒क्ष्ण॒योप॑। ॥ [५८] ॥ उप॑ दधाति। द॒धा॒ति॒ तस्मा᳚त्। तस्मा॑दक्ष्णया। अ॒क्ष्ण॒या प॒शव॑ः। प॒शवोऽङ्गा॑नि। अङ्गा॑नि॒ प्र। प्र ह॑रन्ति। ह॒र॒न्ति॒ प्रति॑ष्ठित्यै। प्रति॑ष्ठित्यै॒ याः। प्रति॑ष्ठित्या॒ इति॒ प्रति॑—स्थि॒त्यै॒। याः प्राची᳚ः। प्राची॑स्ताभि॑ः। ता॒भि॒र् वसि॑ष्ठः। वसि॑ष्ठ आ॒र्द्ध्नो॑त्। आ॒र्द्ध्नो॒द् याः। या द॑क्षि॒णा। द॒क्षि॒णा ताभि॑ः। ताभि॑र् भ॒रद्वा॑जः। भ॒रद्वा॑जो॒ याः। याः प्र॒तीची᳚ः। प्र॒तीची॑स्ताभि॑ः। ताभि॑र् वि॒श्वामि॑त्रः। वि॒श्वामि॑त्रो॒ याः। वि॒श्वामि॑त्र॒ इति॑ वि॒श्व—मि॒त्रः। या उदी॑चीः। उदी॑चीस्ताभि॑ः। ताभि॑र् ज॒म-

दग्निः। जमदग्निर् याः। या ऊद्ध्वाः। ऊद्ध्वास्ताभिः। ताभिर् विश्वकर्मा। विश्वकर्मा यः। विश्वकर्मेति विश्व—कर्मा। य एवम्। एवमेतासाम्। एतासामृद्धिम्। ऋद्धिव्वेद। वेदर्द्ध्नोति। ऋद्ध्नोत्येव। एव यः। य आसाम्। आसामेवम्। एवम् बन्धुताम्। बन्धुताव्वेद। वेद बन्धुमान्। बन्धुमान् भवति। बन्धुमानिति बन्धु—मान्। भवति यः। य आसाम्। आसामेवम्। एवम् क्लृप्तिम्। क्लृप्तिव्वेद। वेद कल्पते। कल्पतेऽस्मै। ॥ [५९] ॥ अस्मै यः। य आसाम्। आसामेवम्। एवमायतनम्। आयतनव्वेद। आयतनमित्या—यतनम्। वेदायतनवान्। आयतनवान् भवति। आयतनवानित्यायतन—वान्। भवति यः। य आसाम्। आसामेवम्। एवम् प्रतिष्ठाम्। प्रतिष्ठाव्वेद। प्रतिष्ठामिति प्रति—स्थाम्। वेद प्रति। प्रत्येव। एव तिष्ठति। तिष्ठति प्राणभृतः। प्राणभृत उपधाय। प्राणभृत इति प्राण—भृतः। उपधाय सय्यँतः। उपधायेत्युप—धाय। सय्यँत उप। सय्यँत इति सम्—यतः। उप दधाति। दधाति प्राणान्। प्राणानेव। प्राणानिति प्र—अनान्। एवास्मिन्न्। अस्मिन् धित्वा। धित्वा सय्यँद्भिः। सय्यँद्भिः सम्। सय्यँद्भिरिति सय्यँत्—भिः। सय्यँच्छति। यच्छति तत्। तथ् सय्यँताम्। सय्यँताꣳ सय्यँत्वम्। सय्यँतामिति सम्—यताम्। सय्यँत्वमथो। सय्यँत्वमिति सय्यँत्—त्वम्। अथो प्राणे। अथो इत्यथो। प्राण एव। प्राण इति प्र—अने। एवापानम्। अपानम् दधाति। अपानमित्यप—अनम्। दधाति तस्मात्। तस्मात् प्राणापानौ। प्राणापानौ सम्। प्राणापानाविति प्राण—अपानौ। सम् चरतः। चरतो विषूचीः। विषूचीरुप। उप दधाति। दधाति तस्मात्। तस्माद् विष्वञ्चौ। विष्वञ्चौ प्राणापानौ। प्राणापानौ यत्। प्राणापानाविति प्राण—अपानौ। यद् वै। वा अग्नेः। अग्नेरसय्यँतम्। असय्यँतमसुवर्ग्यम्। असय्यँतमित्यसम्—यतम्। ॥ [६०] ॥ असुवर्ग्यमस्य। असुवर्ग्यमित्यसुवः—ग्यम्। अस्य तत्। तथ् सुवर्ग्यः। सुवर्ग्योऽग्निः। सुवर्ग्य इति सुवः—ग्यः। अग्निर् यत्। यथ् सय्यँतः। सय्यँत उपदधाति। सय्यँत इति सम्—यतः। उपदधाति सम्। उपदधातीत्युप—दधाति। समेव। एवैनम्। एनय्यँच्छति। यच्छति सुवर्ग्यम्। सुवर्ग्यमेव। सुवर्ग्यमिति सुवः—ग्यम्। एवार्कः। अर्क स्त्र्यविः। त्र्यविर् वयः। त्र्यविरिति त्रि—अविः। वयः कृतम्। कृतमयानाम्। अयानामिति। इत्याह। आह वयोभिः। वयोभिरेव। वयोभिरिति वयः—भिः। एवायान्। अयानव। अव रुन्धे। रुन्धेऽयैः। अयैर् वयाꣳसि। वयाꣳसि सर्वतः। सर्वतो वायुमतीः। वायुमतीर् भवन्ति।

वायुमतीरिति वायु—मतीः। भवन्ति तस्मात्। तस्मादयम्। अयꣳ सर्वतः। सर्वतः पवते। पवत इति पवते॥ ॥ [६१] ॥

(पश्चा देताः पुरो अरुष्णाया कल्पते असम् यतम् पञ्चत्रिꣳशच्च) ॥ १० ॥

गायत्री त्रिष्टुप्। त्रिष्टुब् जगती। जगत्यनुष्टुक्। अनुष्टुक् पङ्क्त्या। अनुष्टुगित्यनु—स्तुक्। पङ्क्त्या सह। सहेति सह॥ बृहत्युष्णिहा। उष्णिहा ककुत्। ककुथ् सूचीभिः। सूचीभिः शिम्यन्तु। शिम्यन्तु त्वा। त्वेति त्वा॥ द्विपदा या। द्विपदेति द्वि—पदा। या चतुष्पदा। चतुष्पदा त्रिपदा। चतुष्पदेति चतुः—पदा। त्रिपदा या। त्रिपदेति त्रि—पदा। या च। च षट्पदा। षट्पदेति षट्—पदा॥ सछन्दा या। सछन्दा इति स—छन्दाः। या च। च विच्छन्दाः। विच्छन्दाः सूचीभिः। विच्छन्दा इति वि—छन्दाः। सूचीभिः शिम्यन्तु। शिम्यन्तु त्वा। त्वेति त्वा॥ महानाम्नी रेवतयः। महानाम्नीरिति महा—नाम्नीः। रेवतयो विश्वाः। विश्वा आशाः। आशाः प्रसूवरीः। प्रसूवरीरिति प्र—सूवरीः॥ मेद्ध्या विद्युतः। विद्युतो वाचः। विद्युत इति वि—द्युतः। वाचः सूचीभिः। सूचीभिः शिम्यन्तु। शिम्यन्तु त्वा। त्वेति त्वा॥ रजता हरिणीः। हरिणीः सीसाः। सीसा युजः। युजो युज्यन्ते। युज्यन्ते कर्मभिः। कर्मभिरिति कर्म—भिः॥ अश्वस्य वाजिनः। वाजिनस्त्वचि। त्वचि सूचीभिः। सूचीभिः शिम्यन्तु। शिम्यन्तु त्वा। त्वेति त्वा॥ नारीस्ते। ॥ [६२] ॥ ते पत्नयः। पत्नयो लोम। लोम वि। वि चिन्वन्तु। चिन्वन्तु मनीषया। मनीषयेति मनीषया॥ देवानाम् पत्नीः। पत्नीर् दिशः। दिशः सूचीभिः। सूचीभिः शिम्यन्तु। शिम्यन्तु त्वा। त्वेति त्वा॥ कुविदङ्ग। अङ्ग यवमन्तः। यवमन्तो यवम्। यवमन्त इति यव—मन्तः। यवम् चित्। चिद् यथा। यथा दान्ति। दान्त्यनुपूर्वम्। अनुपूर्वँ वियूय। अनुपूर्वमित्यनु—पूर्वम्। वियूयेति वि—यूय॥ इहेहैषाम्। इहेहेतीह—इह। एषाम् कृणुत। कृणुत भोजनानि। भोजनानि ये। ये बर्हिषः। बर्हिषो नमोवृक्तिम्। नमोवृक्तिम् न। नमोवृक्तिमिति नमः—वृक्तिम्। न जग्मुः। जग्मुरिति जग्मुः॥ ॥ [६३] ॥

(नारी त्रिꣳशच्च) ॥ ११ ॥

कस्त्वा । त्वा छ्यति । छ्यति कः । कस्त्वा । त्वा वि । वि शास्ति । शास्ति कः । कस्ते । ते गात्राणि । गात्राणि शिम्यति । शिम्यतीति शिम्यति ॥ क उ । उ ते । ते शमिता । शमिता कविः । कविरिति कविः ॥ ऋतवस्ते । त ऋतुधा । ऋतुधा परुः । ऋतुधेत्यृतु—धा । परुः शमितारः । शमितारो वि । वि शासतु । शासत्विति शासतु ॥ सँव्वथ्सरस्य धायसा । सँव्वथ्सरस्येति सम्—वथ्सरस्य । धायसा शिमीभिः । शिमीभिः शिम्यन्तु । शिम्यन्तु त्वा । त्वेति त्वा ॥ दैव्या अद्ध्वर्यवः । अद्ध्वर्यवस्त्वा । त्वा छ्यन्तु । छ्यन्तु वि । वि च । च शासतु । शासत्विति शासतु ॥ गात्राणि पर्वशः । पर्वशस्ते । पर्वश इति पर्व—शः । ते शिमाः । शिमाः कृण्वन्तु । कृण्वन्तु शिम्यन्तः । शिम्यन्त इति शिम्यन्तः ॥ अर्द्धमासाः परूꣳषि । अर्द्धमासा इत्यर्द्ध—मासाः । परूꣳषि ते । ते मासाः । मासाः छ्यन्तु । छ्यन्तु शिम्यन्तः । शिम्यन्त इति शिम्यन्तः ॥ अहोरात्राणि मरुतः । अहोरात्राणीत्यहः—रात्राणि । मरुतो विलिष्टम् । विलिष्टꣳ सूदयन्तु । विलिष्टमिति वि—लिष्टम् । ॥ [६४] ॥ सूदयन्तु ते । त इति ते ॥ पृथिवी ते । तेऽन्तरिख्षेण । अन्तरिख्षेण वायुः । वायुश्छिद्रम् । छिद्रम् भिषज्यतु । भिषज्यत्विति भिषज्यतु ॥ द्यौस्ते । ते नख्षत्रैः । नख्षत्रैः सह । सह रूपम् । रूपम् कृणोतु । कृणोतु साधुया । साधुयेति साधुया ॥ शम् ते । ते परेभ्यः । परेभ्यो गात्रेभ्यः । गात्रेभ्यः शम् । शमस्तु । अस्त्ववरेभ्यः । अवरेभ्य इत्यवरेभ्यः ॥ शमस्थभ्यः । अस्थभ्यो मज्जभ्यः । अस्थभ्य इत्यस्थ—भ्यः । मज्जभ्यः शम् । मज्जभ्य इति मज्ज—भ्यः । शमु । उ ते । ते तनुवे । तनुवे भुवत् । भुवदिति भुवत् ॥ ॥ [६५] ॥

(विलिष्टम् त्रिꣳशच्च) ॥ १२ ॥

॥ हरिः ॐ ॥

पञ्चमकाण्डे द्वितीयः प्रश्नः — क्रम पाठः — समाप्तः

| अनुवाकाः | पञ्चशत्यः |
|---|---|
| १२ | ६५ |

ॐ